लक्ष्मीस्तोत्रम् ।

LAKṢMĪSTOTRAM.

Begins on fol. 8 (a) of the manuscript described under D. No. 18275.

Complete.

Same work as that described under R. No. 673 (g).

D. No. 18277.

Palm leaf. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 46. Lines, 4, 5 on a page. Kannada. Injured. Extent, 285 Granthas.

मेघसन्देशः by कालिदासः ।

MEGHASANDEŚAḤ by KĀLIDĀSA.

Complete.

Same work as that described under D. No. 11869.

D. No. 19278.

Palm leaf $9\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 28. Lines, 6, 5, 4 on a page. Kannada. Injured. Extent, 160 Granthas.

आह्निकम् ।

ĀHNIKAM.

Begins on fol. 3 (a).

Fol. 1 (a). Contains Nārāyaṇavarmastotram.

Fol. 1 (b), and 2 (a). contains Hariharatāratamyastotra.

Fol 2 (b). Contains Nāmāṣṭakastotram.

Incomplete.

This contains Snānavidhi and Sandhyāvandanavidhi.

Similar to the work described under D. No. 2822.

Beginning :

स्नानसङ्कल्पतीर्थराजाय नमः ।
त्वं राजा सर्वतीर्थानां त्वमेव जगतःपिता ।
याचितं तीर्थ . . .सर्वपापैः प्रमुच्यते ।।
अतितीक्ष्ण महाकाय! कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ।।

हरिः ओं, श्रीगोविन्द गोविन्द, श्रीविष्णोराज्ञया प्रवर्तमानस्याद्यब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वत—

End :

दशमी त्रयोदशर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्व ऋषिः । सू . . . गायत्री छन्दः । उदयं तमसस्परि चतस्रो अनुष्टुप् । . . . . . उ .. . . नब्दैः त्रयं त्रिचो रोगघ्नं बर्हवि- षं नाशयेत् । सूर्योपस्थाने विनियोगः ।

D. No. 18279.

Palm leaf. 13 × 1½ inches. Pages, 20. Lines. 6 on a page. Telugu. Injured. Extent, 150 Granthas.

श्राद्धप्रयोगः ।

ŚRĀDDHAPRAYOGAḤ.

Complete.

Same work as that described under D. No. 11869.

D. No. 18280.

Palm leaf. 13 × 1½ inches. Pages, 52. Lines. 4, 5 on a page. Kannada, Injured. Extent, 90 Granthas.

मेघसन्देशः by कालिदासः ।

MEGHASANDEŚAḤ by KĀLIDĀSAḤ.

Complete.

Same work as that described under D. No. 5849.

Fol. 17 (b) left blank.

D. No. 18281.

Palm leaf. 14 × 1¾ inches. Pages, 20. Lines. 11 on a page. Grantha Injured. Extent, 375 Granthas.

श्रीरङ्गमाहात्म्यम् ।

ŚRĪRAṄGAMĀHĀTMYAM.

Incomplete.

Contains Adhyāyas 4, 6, 7, 8, 9, complete 5th and 10th incomplete.

Taken from Brahmāṇḍapurāṇa.

Same work as that described under D. No. 2569.

Beginning :

आत्मार्चनावतीर्णोऽस्मि तव . . . . . ।
[. .] द्यमर्चावतारं मे नित्यमर्चाय मुक्तये ।।
उदासीनोप्यहं ब्रह्मन् लीलार्थमसृजं जगत् ।
* * * * * *
तिले तैलमिव व्याप्तं मातृवद्धितकारिणम् ।।

End :

इति श्रीब्रह्माण्डपुराणे महेश्वरनारदसंवादे पञ्चमोऽध्यायः ।
तत्र मृष्टं प्रदातव्यमन्नमारोग्यवृद्धये ।
प्रतिग्रहकृतात् पापात् ततः स्नात्वा विशुध्यति ।।
* * * * * * *

D. No. 18282.

Palm leaf. $8\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 10. Lines, 6, 7 on a page. Telugu. Injured. Extent, 60 Granthas.

रश्मिमाला ।

RAŚMIMĀLĀ.

Begins on fol. 1 (a). The other works here in are Śyāmalādhyāna-śloka, 12 (a). Bhūtatrāsayantra, 15 (a), Dhanavidya, 16 (a), Asta trimśatkalānyāsa, 19 (a).

Complete.

Similar to the work described under D. No. 10817.

Beginning :

रसामृतं ब्रह्मभूर्भुवस्सुवरों, ओं हंसः सोऽहं, । ओं नमः शिवाय ।
ओम् । आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः ।
वासांसि मम गावश्च अन्नपाने च सर्वदा ॥
ततो मे श्रियमावह लोमशां पशुभिः सह ।
ओं नमः शिवाय, ओं ह्रीं,

* * * * * * *

विश्वरूपाय वै नमो नमः । ओं शान्तिः शान्तिः, शान्तिः,
पूर्वं तद्भावि वा विद्या रश्मिमालां विहाय चेत् ।
लब्ध्वा तदन्यमाभाष्यमाश्रयेद्विधिना नृपः ॥

మున్ను చెప్పిన రశ్మిమాలా పంచదశాక్షరి కూడి ప్రయోగాలు చేసే విద్యలు.

End :

ध्यानम्—

गौरीवल्लभ कामारे कालकूटविषाशन ।
मामुद्धरापदम्भोधेः त्रिपुरघ्नान्तकान्तक ॥

Fol. 6 to 11 , left blank.

D. No. 18283.

Pages, 4, Lines, 7, 6 on a page. Telugu, Injured. Extent, 20 Granthas.

श्यामलाध्यानश्लोकाः ।

ŚYĀMALĀDHYĀNAŚLOKĀH.

Begins on fol. 12 (a) of the manuscript described under last No.

Complete.

Similar to the work described under D. No. 10846.

Beginning :

वीणावादनतत्परां प्रविलसद्बालेन्दुबद्धालकां
मुक्ताभूषणलाञ्छिताननलसत्कस्तूरिरेखाञ्चिताम्
शैलेन्द्राभघनोन्नतामरकरीकुंभाभवक्षोरुहां
देवीं नीरदकोमलाम्बरधरां वन्दे वरां श्यामलाम् ॥

बालां यौवनलालसां मृदुलवस्मेराङ्कशोणाधरां
बर्होत्तंसविराजमानचिकुरां बर्हाम्बरालङ्कृताम् ।
नानारत्ननिबद्धकङ्कणलसद्धस्ताब्जकीराङ्कितां
भिल्लीवेषमनोहरां सुरुचिरां वन्दे वरां श्यामलाम् ।

End :

पूर्वाम्नायरसालकाननपिकामोङ्कारमूर्ध्नि स्थितां
मायाबीजधराधरेन्द्रनुदरीपानेन्दु बिम्बामृताम् ।
संसारार्णवजातकल्मषकरीदर्पघ्नपञ्चाननां
भिल्लीवेषधरां त्रिलोचनवधूं वन्दे वरां श्यामलाम् ॥

मुक्तारञ्जितहारकाम्बरधरां वंशीनिनादप्रियां
भक्तानन्दसरोजमानसलसन्मार्ताण्डबिम्बोपमाम् ।
स . . . तेन्दुविलासिनीलजलदन्यक्कारिधम्मिल्लकां
श्रीमच्चन्दनसौरभांकिततनुं बालां भजे श्यामलाम् ॥

D. No. **18284.**

Pages, 2, Lines, 6 on a page. Telugu, Injured. Extent. : Granthas.

भूतत्रासयन्त्रम् ।

BHŪTATRĀSAYANTRAM.

Begins on fol. 15 (a) of the manuscript described under D. No. 18282.

Complete.

Similar to the work described under D. No. 7090.

Beginning :

अथातः संप्रवक्ष्यामि डाकिनी त्रासकं परम् ।
भूतप्रेतपिशाचाद्यैर्डाकिनीब्रह्मराक्षसैः ॥

यदा ग्रस्तो नरः कोपि नारी वा बालकोपि वा ।
तदा यन्त्रं प्रकुर्वीत तत्रासां भूतरक्षसाम् ॥

खटिकायां लिखित्वा तु खर्परे नूतने शुभे ।
चतस्रः तिर्यगालोड्या ऊर्ध्वतः पञ्च रेखकाः ॥
एवं सञ्जायते कोष्ठा द्वादशैव वरानने ।
ह्रीङ्कारप्रतिकोष्ठेषु विलिख्य तु प्रपूजयेत् ॥

बलिपुष्पोपहारैश्च ततो धूलिं प्रपूजयेत् ।
संस्थाप्य चाग्निं तदुपरि ज्वाल द्रुधिराननैः ? ।
रुदन्तं च महाभूतं वेगमानं पलायते ।
तत्क्षणं बालकं मुक्त्वा देशत्यागेन गच्छति ॥

Colophon :

इति भूतत्रासयन्त्रम् ।

D. No. 18285.

Pages, 6, Lines, 6 on a page. Telugu. Injured. Extent, 27 Granthas.

धनविद्यामन्त्रः ।

DHANAVIDYĀMANTRAḤ.

Begins on fol. 16 (a) of the manuscript described under D. No. 18282.

A treatise on the Vrata which consists in the worship of Dhanada, the Goddess of richness. The observance of this Vrata is considered to have the power of enabling one to obtain prosperity in his life.

Incomplete.

Beginning :

अथ धनविद्या लिख्यते—

अङ्गन्यासं करन्यासं साङ्गिकास्यास्ति देवता ।
जपहोमार्चनं चैव सद्यः प्रत्यक्षकारकम् ॥

पद्ममष्टदलं चैव ताम्रपात्रेषु संलिखेत् ।
आवाह्य देवतां तत्र मूलेनार्चनमाचरेत् ॥

दुग्धेनार्घ्यं प्रकल्प्याथ शुभ्रैः पुष्पैश्च पूजनम्
नैवेद्यं कल्पयेत्तस्य मम त्रितयपायसम् ।।
पुरश्चरणमस्यास्ति सहस्रं सप्तसप्ततिः ।

End :

तथा घृतेन सिक्तेन मधुना च दशांशकम् ।
होमोपि च विधातव्योऽमुना दारिद्र्यमुक्तये ।।
रात्रौ च जपते चाष्टसहस्रं सप्तवासरात् ।
भुक्ते वाप्यथवा भुक्तिः पायसान्न

D. No. 18286.

Pages, 14, Lines, 4, 5 on a page. Telugu, Injured. Extent, 42 Granthas.

अष्टत्रिंशत्कलान्यासः

AṢṬATRIMŚATKALĀNYĀSAḤ.

Begins on fol. 19 (a) of the manuscript described under D. No. 18282.

Incomplete.

Same work as that described under D. No. 5903.

Beginning :

विन्यासप्रतिमा कृता च निः . . ता सान्निध्य
कृत्स्ना वयं
दंह चापि शरीरिणां निगदिता सामर्थ्यकारोति च ।
आस्ते यत्र तथामुनैव दिनशो विन्यस्तदेहः पुमान्
क्षेत्रं शैवममुञ्च योजनमितं शैवागमज्ञा विदुः ।।

End :

व्रलाय नमः । काल्यै नमः । दक्षिणस्फिचि । बलप्रमथ-नाय नमः । धात्र्यै नमः । वामस्फिचि, सर्वभूतदमनाय नमो भ्रामिन्यै नमः । कट्यां, मनोमोहिन्यै नमः । दक्षिणपार्श्वे ।

D. No. 18287.

Palm leaf. 10 × 1¼ inches. Pages, 239, Lines. 6 on a page. Kannada, much Injured. Extent, 1565 Granthas.

रसरत्नाकरः

RASARATNĀKARAḤ.

Begins on fol. 1 (a). The other work herein is Namaśśivāyāṣṭakam 130 (a).

Incomplete.

Contains Upadeśas, 1 to 15. Many leaves are broken in the beginning. The arrangement of the Adhyāyas in this is not in order.—

Fol. 120 (a). Contains a commentary of the above work (only a small portion).

Same work as that described under D. No. 8053.

D. No. **18288.**

Pages, 6, Lines, 5 on a page. Kannada, Injured. Extent, 28 Granthas.

नमश्शिवायाष्टकम् ।

NAMAŚ ŚIVĀYĀṢṬAKAM.

Begins on fol. 130 (a) of the manuscript described under No. D. 18287.

Complete.

Same work as that described under R. No. 324 (i).

D. No. **18289.**

Palm leaf. 12 × $1\frac{1}{4}$ inches. Pages, 440. Lines. 5, 6, 7 on a page. Grantha, much Injured. Extent, 3850 Granthas.

मानसारः ।

MĀNASĀRAḤ.

Incomplete.

Contains Adhyāyas, 1 to 46.

Same work as that described under No. 13041. The arrangement of the Adhyayas as found in this manuscript is slightly different from that found in the manuscripts described under D No. 13041 and 13042.

D. No. **18290.**

Palm leaf. $11\frac{1}{4}$ × $\frac{3}{4}$ inches. Pages, 33. Lines. 2, 3 on a page. Telugu, much Injured. Extent, 120 Granthas.

इतिहासोपनिषत् ।

ITIHĀSOPANIṢAT.

Complete.

Many leaves are broken.

Fol. 17 (b), contain introductory stanzas of some Dharmaśāstra.

Same work as that described under D. No. 299.

D. No. 18291.

Palm leaf. 9½ × 1¼ inches. Pages, 70. Lines. 6 on a page. Kannada Injured. Extent, 500 Granthas.

सामुद्रिकलक्षणम् ।

SĀMUDRIKALAKṢAṆAM.

Begins on fol. 1 (a). The other work here in is Aparājiteśvaraśataka (Kannaḍa), fol. 37 (a).

Complete.

Taken from Skāndapurāṇa.

Similar to the work described under D. No. 14004.

Beginning :

श्रीस्कन्दः उवाच—

ब्रह्मचारिसमाचार इति ते समुदीरितः ।
घटोद्भवप्रसङ्गेन स्त्रीलक्षणमथ ब्रुवे ॥

गुरोरनुज्ञया स्नात्वा व्रतं चेदं समाप्य च ।
उद्वहेतां ततो भार्यां संपन्नां सर्वलक्षणाम् ॥
दक्षा प्रजावती साध्वी प्रियवाक् च वशंवदा
गुणैरमीभिः संयुक्ता सा श्रीः स्त्रीरूपधारिणी ॥

सदा गृही सुखं भुङ्क्ते स्त्री लक्षणवती यदि ।
अतः सुखसमृद्ध्यर्थमादौ लक्षणमीक्षयेत् ॥

Colophon :

इति स्कान्दपुराणे काशीखण्डे स्त्रीलक्षणवर्णनं नाम सप्तत्रिंशोऽध्यायः ।

End :

इति स्तुत्वा महाभागां राजपुत्रीं पतिव्रताम् ।
प्रणम्य च गुरुः प्राह मुनिं सर्वार्थकारकम् ॥

प्रणवस्त्वं श्रुतिरियं क्षमैषा त्वं स्वयं तपः ।
सत्क्रियेयं फलं त्वं हि कन्यैषेति महामुने ॥

इमं पतिव्रताध्यायं श्रुत्वा स्त्री पुरुषोऽपि वा ।
पापकञ्चुकमुत्सृज्य शक्रलोकं प्रयास्यति ॥

Colophon :

इति स्कान्दपुराणे काशीखण्डे लोपामुद्रोपाख्यानं नाम चतुर्थो-ऽध्याय: ।

It is given at the end that this work was transcribed by Adappayya, son of Malayūr Devayya on Thursday the 10th day of dark fort night in the month of Jyeṣṭha in the year Rudhirodgāri.

D. No. 18292.

Palm leaf. 15 × 1¼ inches. Pages, 48. Lines. 4, 5 on a page. Nandinagari. Injured. Old. Extent, 360 Granthas.

प्रक्रियाकौमुदी by रामचन्द्राचार्य: ।

PRAKRIYĀKAUMUDĪ by RĀMACANDRĀCĀRYA.

Incomplete.

Contains upto the end of Śabdādhikāra.

Same work as that described under D. No. 1337.

D. No. 18293.

Palm leaf. 13 × 1¼ inches. Pages, 32. Lines. 6 on a page. Grantha. Injured. Extent, 250 Granthas.

शिशुपालवध: by माघ: ।

ŚIŚUPĀLAVADHAḤ by MĀGHA.

Incomplete.

Contains Sarga 1 to 3. Wants beginning of 1st Sarga and end of 3rd Sarga.

Same work as that described under D. No. 11719.

D. No. 18294.

Palm leaf. 13 × 1½ inches. Pages, 47. Lines. 7, 8 on a page. Nandinagari. Injured. Extent, 900 Granthas

माघमाहात्म्यम् ।

MĀGHAMĀHĀTMYAM.

Incomplete.

Contains Chapters 7, 8, 9, 13 to 20.

Same work as that described under D. No. 2498.

D. No. 18295.

Palm leaf. 14⅛ × 1⅛ inches. Pages, 31. Lines, 5, 6 on a page. Nandinagari. Injured. Extent, 232 Granthas.

मध्वविजय: by नारायणपण्डिताचार्य

MADHVAVIJAYAḤ by NĀRĀYAṆAPAṆḌITĀCĀRYA.

Incomplete.

Contains Sargās 8, 9 complete 10th incomplete.

Same work as that described under R. No. 479.

D. No. 18296.

Pages, 6, Lines, 6 on a page. Telugu, Slightly Injured. Extent, 40 Granthas.

फिट्सूत्राणि ।

PHIṬSŪTRĀṆI.

Begins on fol. 76-a of the MS. described under D. No. 1256.

complete in 4 Patalas.

Same work as that described under R. No. 2540 (d).

D. No. 18297.

Pages, 4, Lines, 6 on a page. Grantha. Slightly Injured. Extent,, 22 Granthas.

गुरुपरम्परास्तोत्रम्

GURUPARAMPARĀSTOTRAM.

Begins on fol. 12(a) of the manuscript described under D. No. 6151.

Complete.

Similar to the work described under D. No. 5234.

Beginning :

यो द्वापरान्ते श्रवणेऽधिकाञ्चि
हेमाम्बुजादाश्वयुजाख्यमासे ।
तं पाञ्चजन्योऽजनि दिव्ययोगी
सरोऽभिधानं शरणं प्रपद्ये ।

मासेऽथ तस्मिन् वसुधावतीर्णं
पारे समुद्रं परिमुल्लनाम्नि ।
भूताभिधानं मुनिमुत्पलान्तं
श्रीमत्प्रदांशं शरणं प्रपद्ये ॥

* * * * * * *

पुनर्वसौ कोलपुरेऽथ मा(से) [मावे]
कृतावतारं घनकेरलेषु ।
श्रीकौस्तुभांशं कुलशेखराख्यं
चेरक्षितीशं शरणं प्रपद्ये ॥

श्रीधन्विनव्याख्यपुरेऽवतीर्णं
मासे मरुद्भेऽग्निशिखाप्रदीपम् ।
गरूत्मदंशं श्वशुरं मुरारेः
श्रीविष्णुचित्तं शरणं प्रपद्ये ।

End :

श्रीरामानुजयोगिसुन्दरवर श्रीशैलनाथान् गुरून्
लोकार्योत्तरवीथिकृष्णकलिजिद्वेदान्तभट्टारकान् ।
श्रीरङ्गे (श्रीगो) विन्दयतीन्द्रपूर्णयमुनावास्तव्यरामान् भजे
पद्माक्षाह्वयनाथयोगिशठजित्सेनेशपद्माहरीन् ॥

D. No. 18293.

Pages, 3, Lines, 6 on a page. Grantha. Slightly Injured. Extent, 15 Granthas.

विष्णुस्तोत्रम् ।

VIṢṆUSTOTRAM.

Begins on fol. 13 (b) of the manuscript described under D. No. 6151, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Similar to the work described under D. No. 8922.

Beginning :

केशवाय विधीशादिकारणाय रथाङ्गिणे ।
नमतां क्लेशनाशाय नमः कनककान्तये ।।

पाञ्चजन्यधरायास्तु पयोदश्याममूर्तये ।
नारायणाय नाथाय नमः सर्वान्तरात्मने ।।

End :

एवमाद्यखिलाकारै रञ्जनाद्रौ चकासते ।
आदृतायास्मदाचार्यैराद्याय महसे नमः ।।

चित्ते परिस्फुरतु चिन्तितकल्पशाखि-
विष्णोर्विलासकलितप्रथमावतारः ।
लक्ष्मीकटाक्षवलनस्य च यस्य चासीत्
सञ्चारकेलिषु समो गुरुशिष्यभावः ।।

D. No. 18299.

Pages, 4. Lines, 6 on a page. Grantha. Slightly. Injured. Extent, 25 Granthas.

कृष्णदेवरायकृतिः by कृष्णराय ।
KṚṢṆADEVARĀYAKṚTIḤ by KṚṢṆARĀYA.

Begins on fol. 15 (a) of the manuscript described under D. No. 6151. wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Contains verses 12 only.

An Autobiography of Kṛṣṇa Devarāya of Tuluva Dynasty of Vijayanagar. It is not known whether this is an independent work with this name or a portion of Rasamañjari which is said by somebody as the work of Kṛṣṇadevarāya.

Beginning :

क्षीरांभोधितपःफलेन महता नीराजितोरःस्थल-
स्ताराधीशदिनाधिनाथनयनो धाराधरश्यामलः ।
यो वेदान्तगिरामलक्ष्यमहिमा देवेशमुख्यैः स्तुतः
सोयं तिष्ठतु मामकीनहृदये श्रीवेङ्कटाधीश्वरः ।।

सान्द्रानन्दघनः समग्रकरुणासंपूर्णनेत्राञ्चलो
मन्दाकिन्यधिवासमञ्जुलजटाजूटो . . . . ।
कल्याणाचलकार्मुकः कलयतां कल्याणमव्याहतं
चन्द्रालङ्कृतमौलि रद्रितनयाशृङ्गारिताङ्गः शिवः ॥

* * * * * * * *

श्रीमानभूत् तुर्वसुवंशमौलिः
श्रीतिम्मभूपो जगदेकवीरः ।
स देवकीनाम्नि कलत्ररत्ने
प्रासूत वीरं नृपतीश्वराख्यम् ॥

* * * * * * * *

स बुक्कमाम्बां परिणीय तस्या-
मौदार्यगांभीर्यविवेकशौर्यैः ।
दाक्षिण्यकारुण्यनयैश्च युक्तं
लेभे तनूजं नरसक्षितीशम् ॥

* * * * * * *

कुलेन शीलेन गुणेन भक्त्या
प्रेमानुकूल्येन च संयुतायाम् ।
नागाम्बिकायां नरसक्षितीशः
प्रासूत मां न्यक्कृतवैरिवर्गः ॥

* * * * *

उत्साहं मम वीक्ष्य मद्गुरुरथ श्रीव्यासतीर्थो मुनिः
पर्यालोच्य पुराणशास्त्रविविधाम्नायेतिहासा-
दिकान् ।
लब्धास्तत्र कथा हरेः पशुपतेः साम्यं निरूप्याधिकं
विष्णुं कीर्तय सर्वथेत्युपदिशन् मह्यं मुदा दत्तवान् ।

D. No. 18300.

Pages, 2, lines, 8 on a page. Telugu, Injured. Extent, 20 Granthas.

विष्णुपञ्जरमन्त्रः ।

VIṢṆUPAÑJARAMANTRAḤ.

Begins on fol. 18 (a) of the manuscript described under D. No. 5533, Complete.

As found in the Brahmāṇḍapurāṇa.

Same work as that described under No. 7237.

D. No. 18301.

Pages, 11, lines, 5 on a page. Telugu, much Injured. Extent• 75 Grnthas.

रहस्यत्रयार्थविचारः by नारायणमुनिः ।

RAHASYATRAYĀRTHAVICĀRAḤ by NĀRĀYAṆAMUNI.

Begins on fol. 61 (b) of the manuscript described under D. No. 5777 wherein this work has been mentioned as Rahasyatrayārtha in the list of other works.

Complete.

Same work as that described under R. No. 3671 (f).

D. No. 18302.

Palm leaf. 13¾ × 1¼ inches. Pages, 58. Lines. 9 on a page. Grantha• Slightly Injured. Extent, 1,100 Granthas.

तप्तमुद्राधारणप्रमाणादर्शः by लक्ष्मणाचार्यः ।

TAPTAMUDRĀDHĀRAṆAPRAMĀṆĀDARŚAḤ by LAKṢMAṆĀCĀRYA.

Complete.

Similar to the work described under D. No. 5255. Fol. 1 to 3 contains a small portion of the above work.

Beginning :

विष्णोश्चक्रमहं वन्दे विद्वज्जनविभूषणम् ।
विदारयति यन्नित्यं वैदिकानां विरोधिनः ।।
तप्तचक्रादिमुद्राणां धार्यत्वं ब्राह्मणादिभिः ।
श्रुतिस्मृतिसदाचारसिद्धं सन्दर्शयाम्यहम् ।।
सन्तः सन्मार्गनिरताः सत्वोन्मीलितचक्षुषः ।
पश्यन्त्वमत्सरधियः प्रामाणिकमिदं परम् ।।

श्रुतिस्मृतितदाचारा हि धर्मनिर्णये प्रमाणं, तथाह मनुः—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ।।

—इति ।

आपस्तम्बः—धर्मज्ञसमयः प्रमाणं, वेदाश्चेति, यत्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्म इति च ।

* * * * * * * *

अतस्तप्तचक्रादिमुद्राधारणरूपं धर्मं प्रमाणैरेतैः प्रदर्शयामः । श्रुतिस्तावत् यजुर्वेदे तृतीये काठके चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूता अति पाप्मानमरातिं तरेम ।

* * * *

किंच ब्रह्माण्डे विष्णुरहस्ये मोक्षधर्मे षट्पञ्चाशोऽध्याये श्रुतिस्मृतिविहितस्य चक्रधारणस्य माहात्म्यं सर्वं स्वयमेव सर्वज्ञेन भगवता महेश्वरेण सामान्येन वैष्णवमाहात्म्यं पृच्छन्त्यै देव्यै तद्वदता नितरां प्रपञ्चेनोक्तम् । स एवायमध्यायः ।

End :

राज्ञा वल्लालनाम्ना जगति भगवतः शंखचक्रादिमुद्रां
तप्तां विप्रादिधार्यां वदति यदि विधिः वैदिकस्तं वदेति ।
पृष्टो व्यासार्यपुत्रः परिषदि विदुषां रङ्गभर्तुः पुरोधाः
वेदाचार्यःप्रमाणं व्यवृणुत तदिदं लक्ष्मणाख्यो विपश्चित् ।।

चतुर्णां वर्णानां विहितमिति चक्राङ्कनविधेः
प्रमाणं यत्प्रोक्तं निगमगुरुणा कूरपतिना ।
तदादावालिख्य स्वय (मिहच) वल्लालनृपतिर्विपक्षा विद्वांसः परमितिविलक्षाः समभवन् ।।

श्री वेदव्यासभट्टस्य सूनुना श्रुतशालिना ।
वेदाचार्येण वेदार्थो व्यक्तमेष विचारितः ।।

Colophon :

इति हरितकुलतिलकस्य श्रीवेदव्यासभट्टसूनोः श्रीरङ्गराज दिव्याज्ञालब्धवेदाचार्यापरनामधेयस्य लक्ष्मणाचार्यस्य कृतिषु सुदर्शनादिश्रीपञ्चायुधमुद्रारूपतप्तभगवल्लाञ्छनधारणविधायकप्रमाणशत-प्रदर्शनं परिपूर्णम् ।

वेदाचार्यं विपश्चिज्जनमहितधियं विश्रुतज्ञानसिद्धेः
वेदव्यासस्य पुत्रं वरगुणजलधेर्वाग्विनेतुश्च पुत्रम्
रङ्गेशापत्यभावं समधिगतवतो रामसूरेः प्रपौत्रं,
श्रीवत्साङ्कस्य कूरान्वयकुमुदविधोः पञ्चमं संश्रयामः ॥

D. No. 18803.

Pages, 7, lines, 4 on a page. Grantha. Injured. Extent, 35 Granthas.

यज्ञोपवीतधारणमन्त्रः ।
YAJÑOPAVĪTADHĀRAṆAMANTRAḤ.

Begins o fol. 6 (a) of the manuscript described under D. No. 28 7.

Incomple e.

Wants the beginning.

Similar to the work described under D. No. 2850.

Beginning :

. . . रणे कार्ये तत्कार्येप्युपयोगात् पूर्वं कार्यं, संस्कारत्वात्, स्वाध्यायदिवसे शुक्लपक्षे पूर्वाह्णे . . . पनिष्क्रम्य देवागारे नदीतीरे गोष्ठेपु वा शुचौ देशे . . . प्रयतो धृतोर्ध्वपुण्ड्रोत्तरीयो द्विराचान्तो दर्भासने प्राङ्मुख उदङ्मुखो वा समुपविश्य प्राणानायम्य शुचिभिर्निर्मितं कार्पाससूत्रमादाय प्रणवेनाभिमन्त्र्य आपोवा इदमित्यद्भिरभिषिच्य

* * * *

अथ नवतन्तुदेवताग्रन्थित्रयं दैवतानि यज्ञोपवीतदेवताधिदैवतान्यावाह्य गन्धादिभिरभ्यर्चयेत् ।

भूर्वारितेजो वायुःखं प्राण आत्मा त्रयं तथा ।
कस्माद्भवन्ति तन्तूनां नवानामधिदैवतम् ।।
ग्रन्थित्रयस्याधिपतयः पितामहहरीश्वराः ।
यज्ञोपवीताकारस्य परब्रह्माधिदैवतम् ।।

इति भरद्वाजः ।

End :

स ऋषिच्छन्दोदैवतं यज्ञोपवीतमन्त्रमुच्चार्य दक्षिणं बाहु-मुद्धृत्य शिरसा सह कर्णे . . . निक्षिपेत् । सूत्रान्तराले दक्षिणं बाहुं कुर्यात् । गृहस्थस्य प्रत्युपवीतम् ।

D. No. 18304.

Pages, 42. Lines, 5 on a page. Grantha. Injured. Extent. 120 Granthas.

रहस्यत्रयसारश्लोकाः ।

RAHASYATRAYASĀRAŚLOKĀḤ.

Begins on fol. 27 (a) of the manuscript described under D. No. 12770.

Complete.

Same work as that with Tamil Stanzas described under D. No. 871, of the Tamil descriptive catalogue Vol. II, but with the additional Stanzas found in the begining.

Beginning :

श्रीवादिहंसांबुदरङ्गराज-गुरू
रामानुजाचार्यनतार्तिहन्तॄन् ।
यतीन्द्रगोष्ठीपुरपूर्णवर्य-
कलिन्दजातीरनिवासरामान् ।।

पद्माक्षनाथार्यशठारिविष्णु
सेनान्यपद्माकमलाधिनाथान् ।
सारार्थसंरक्षकजीवलोकान्
नतेन मूर्ध्ना प्रणमाम्यभीक्ष्णम् ।।

आत्माभावितभूषणादिजनिताध्यारादिवैदेशिकं
वेदान्तद्वयदेशिकाश्रयमहासार्वज्ञसंवादकम् ।
वृत्या मध्यमयैव योक्तुमपि यो मुक्त्याप्यलं तद्भजे
शास्त्रं निस्समरत्नमनुराट् गीतान्तसारात्मकम् ॥

D. No. 18305.

[Pa]ges, 21, Lines, 4, 5 on a page. Kannada, Injured. Extent, 70 Granthas.

रामस्तुतिः ।

RĀMASTUTIH.

Begins on fol. 82 (a) of the manuscript described under D. No. 12770.

Complete.

In praise of Rāma. This work has been named as Rāmodāharaṇam in the Alphabetical Index of Sanskrit manuscripts, Part III.

Beginning :

जयतु जयतुधीरः सर्वलोकैकवीरः
कलुषघनसमीरः कण्ठविन्यस्तहारः ।
कुवलयदलनेत्रः कोमलश्यामगात्रः
सरस . . कलापः शान्तिमान् रामभूपः ॥

कलिका—

अपिच्च तङ्क्तिवदनाचलशङ्कः
चपलेतरमुनिजननिर्वङ्कः ।
कपटकुरङ्गविखण्डनचण्डः
कुपितनिशाचरकुलभेरुण्डः ॥

* * * * *

उत्कलिका—

मुनिजनमण्डन घनवाग्दण्डन
पाषाणीकृतयोषादुष्कृत-
चटुलचपलतर कुटिलतिमिरहर-
पदनखवचन कदनमृगेन्द्र ॥

श्रीमन्तं बलवैरिनील-चिकुरं स्मेराननं श्यामलं
कर्णान्तायतलोचनं मुनिनुतं कारुण्यपाथोनिधिम् ।
शोणांभोरुहपादपल्लवयुगं क्षोणीतनूजायुतं,
राजत्कुण्डलदीप्तगण्डयुगलं रामं सुरामं भजे ॥

*   *   *   *   *   *

राकाशीतमयूखवक्त्रजलजस्वहृत्वानेकसौम्याकरात्
प्रत्यूषारुणकञ्जरागविलसत्पादारविन्दद्वयात् ।
प्रस्फीतस्फुटदिव्यबाणपटलात्प्राप्नोम्यभीष्टं फलं,
श्रीरामात्परवीरसैन्यपवनात्सेवाजनानन्दनात् ॥

End :

त्वं कर्ता जगतां, भजन्ति मुनयस्त्वां नाथ मत्तस्त्वया
नक्रस्तुभ्यमिदं जगत्समभवत्त्वत्तः प्रजानां पते ।
दासोऽहं तव वर्ततां ममममनस्त्वय्येव नित्यं मुदा
सीतानेत्रसरोजबालतरणिश्रीरामचन्द्रे सदा ॥

D. No. 18306.

Pages, 8. lines, 4, 5 on a page. Kannada. Injured. Extent, 22 Granthas.

रामगद्यम् ।

RĀMAGADYAM.

Begins on fol. 92 (a) of the manuscript described under D. No. 12770, wherein this work has been mentioned as "Viṣṇustotram' in the list of other works.

Incomplete.

Stray passages dealing with Lord Rama, Sīta, Gītagovinda, Veṅkaṭagiri, Raṅganātha, etc.

Beginning :

सजलजलदश्यामो रामो जनकस्य वाक्यं श्रुत्वा कुण्ठीचकार । पश्चाज्जनकमहीपतिमनोरथतीरमप्यानन्दजलधौ निमग्नौ सुजन-कल्पतरोः कोदण्डदीक्षागुरोः दशरथमहाराजस्वपुरोहितसुपुत्रमित्र-बान्धवपरिवारमाहूय

* * * * * *

समस्तसद्गुणनयविनयविधेयविवेकवितरणविचक्षणदीक्षागूढार्थनिर्णय-निस्सन्देहनिराघाटनिरवद्यहृद्यपद्यरचनासुवचनतर्कवेदान्तमीमांसाव्याकरणसांख्ययोगादिशास्त्रपारीणानां सर्वसभाजनानां वन्दनं कृत्वा, उपमोत्प्रेक्षाद्यलङ्कारसङ्गीततालानुबन्धं समस्तरसभावानां मूलकन्दं सकलजनानन्दं नानाविधरागप्रदं गीतगोविन्दं भरतशास्त्रानुसारेण अभिनयं जयदेवकविरचनप्रबन्धं सर्वजनचित्तरञ्जनमहं करोमि ।

End :

पर्वतोत्तमः बादरायणादिभिः अभ्यर्चिते दक्षिणबदरिकाश्रमे नारायणगिरौ जय जय रङ्गनाथ जय दि . . . . . .

D. No. 18307.

Pages, 4, lnes, 4, 5 on a page. Kannada, Good. Extent, 16 Granthas..

स्थानसप्तकनिरूपणम् ।

STHĀNASAPTAKANIRŪPAṆAM.

Begins on fol. 45 (b) of the manuscript described under D. No. 8754.

Complete.

This treatise enumerates and defines the seven aims of Buddhistic Saintly life.

Beginning :

सज्जातिः सद्गृहस्थत्वं पारिव्राज्यं सुरेन्द्रता ।
साम्राज्यं परमार्हन्त्यं नैर्वाणं स्थानसप्तकम् ।
पितुरन्वयशुद्धिस्तु सत्कुलं परिभाष्यते ।
मातुरन्वयशुद्धिस्तु जातिरित्यभिलप्यते ।'

End :

श्रीशातमयकुंभमुतस्यन्यकुंभं
गर्भीकृतामलपयोमणिशातकुंभम् ।
शंभन्तु मज्जसंपल्लवदर्पणाद्यैः
संस्थापय स्थिरतरं वरकर्णिकायाम् (?)॥

D. No. 18308.

Pages, 34. Lines, 4 on a page. Kannada. good. Extent, 150 Granthas.

जैनविवाहप्रयोगः ।

JAINAVIVĀHAPRAYOGAḤ.

Begins on fol. 47 (a) of the manuscript described under D. No. 8754.

Complete.

Similar to the work described under D. No. 8774.

Beginning :

अथातश्चतुर्थे दिवसेऽपराह्णे नापितैर्वपनादिकं कृत्वा रात्रौ वरवधूनां मङ्गलस्नानं कृत्वा सम्यगलङ्कार्य उपलेपनादि लाजाहुत्य-वसानान्तं सर्वं पूर्ववदाचर्य ततो वरगमङ्गलसूत्रसंयुक्ततालीं वध्वाः कण्ठे निधाययेत् । तस्य मन्त्रः—

वरेण दत्ता सौवर्णी हरिद्रासूत्रबन्धिता ।
तालीं करोतु जायाया अवतंसः श्रियं सदा ।।

* * * *

अथ दिक्पालपूजा—

आखण्डलानलकृतान्तनिशाचराम्बु-
नाथेशवायुधनदेश्वरमुख्यदेवान् ।
स्वस्वायुधामलवधूजनपुत्रयुक्ता-
नावाहयामि ककुभाधिपतीन् प्रशस्तान् ।

End :

पत्यौ खिन्ने खिन्नाः
मुदिता मुदिते समाकुलाकुलिते ।
प्रतिबिम्बसमा कान्ता
संक्रुद्धे केवलं शान्ता ।।

प्रीत्यागारमुपागते प्रियतमे तद्भाषणे नम्रता-
तत्पादार्पितदृष्टिरासनविधौ तस्योपचारे स्वयम् ।
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति
प्राज्ञैः पुत्रि निवेदिताः कुलवधूशुद्धान्तधर्मा अमी ।।

भर्तुश्चित्तमवेक्ष्य भक्तिसहितं भीत्या स्वहस्तेन वै
सेवां कारय मा कृथा सखिजनेष्वत्यन्तपथ्यान्वितान् ।
पश्चात् लब्धविलासभोगरचनानन्देषु भोगीभवे :
त्वंवाच्य:स्वसुतां पतेर्गृहमुपादिक्षन् महासंपदम् ॥

ततः प्रशय्यां प्रविश कङ्कणं विसृज्य तण्डुलराश्युपरि निक्षिप्यारात्रिकं नि . . . ताम्बूलं दत्वा सुवर्णाशिषं कृत्वा मन्त्राक्षतान् विकीर्य पूर्णघटद्वयावलोकनार्थं गृहमुपविशेत् ।

Colophon :

इति विवाहविधेः प्रयोगः समाप्तः

D. No. 18309.

Pages, 6. Lines, 13 on a page. Nandināgari. Injured. Extent, 160 Granthas.

छान्दोग्योपनिषत् ।

CHĀNDOGYOPANIṢAT.

Begins on fol. 26 (a) of the manuscript described under D. No. 5097.

Incomplete.

Contains 6th adhyāya complete 7th incomplete.

Same as that described under D. No. 451.

D. No. 18310.

Pages, 2. Lines, 4 on a page. Kannada. Slightly Injured. Extent, 6 Granthas.

आपोशनविधिः ।

ĀPOŚANAVIDHIḤ.

Begins on fol. 89 (a) of the manuscript described under D. No. 8733.

Complete.

Some rules bearing on the taking of food by a Dvija or twiceborn

Beginning :

आपोशनविधिः—

अन्नप्रोक्षणमिति कृत्वा परिषिच्य शुभैर्जलैः ।
आपोशनं च गृह्णीयात् पञ्चप्राणाहुतीरपि ॥

ओं ह्रीं झं वं हः पः इदममृतान्नं भवतु स्वाहा—

End :

ओं ह्रीं, उत्साहबलप्राणाय स्वाहा, ओं ह्रीं, आयुर्बलप्राणाय स्वाहा, पञ्चप्राणाहुतिमन्त्रः ।

D. No. 18311.

Pages, 2. Lines, 4 on a page. Kannada. Injured. Extent, 7 Granthas.

षोडशकर्मनामानि ।

ṢOḌAŚAKARMANĀMĀNI.

Begins on fol. 93 (a) of the manuscript described under D. No. 8733.

Complete.

Gives the names of the sixteen functions of life of a Brāhmin which begins with impregnation and ends in death.

Beginning :

षोडशकर्म—

गर्भाधानं प्रमोदं च पुंसवश्च तृतीयकम् ।
सीमन्तोन्नयनं जन्म . . . .
प्राशनं गमनं चौलमक्षराभ्यास एव च ॥

End :

समावर्तो विवाहश्च संन्यासो मरणं तथा ।
इतिषोडशकर्माणि ब्राह्मणानां विधीयते ।
जन्मना जायते शूद्रः कर्मणा जायते द्विजः ।
विद्याभ्यासेन विप्राणां ब्रह्मज्ञानेन ब्राह्मणः ॥

D. No. 18312.

Pages, 2. Lines, 4 on a page. Kannada. Injured. Extent, 7 Granthas.

देवतास्तोत्रम् ।

DEVATĀSTOTRAM.

Begins on fol. 101 (a) of the manuscript described under D. No. 8733.

Gives the names of 24 yakṣis which are considered to be the deities of Jainas.

Complete.

Contains caturvimśatiyakṣanāmāni and Caturvimśatiśāsanadevatā-nāmāni.

Beginning :

देवपालानन्तचतुर्विंशत्यनागततीर्थंकरपरमदेवेभ्योनमोनमः चतुर्विंशतियक्षनाम गोमुखमवहायक्षत्रिमुखयक्षेश्वरतुम्बरकुसुमवरनन्दिविजयाजित . . . . .

End :

मनोवेगा, कान्ती, ज्वालामालिनी, महाकाली, मानवी, गौरी, गान्धारी, वैरीटचनन्तम्नु (?) मानसी, महामानसी, जया, विजया, अपराजिता, वहुरूपिणी चामुण्डी कूष्माण्डी, पद्मावती, सिद्धायन्य श्चेति चतुर्विंशतिशासनदेवतायै नमो नमः ।

D. No. 18313.

Pages, 3. Lines, 6 on a page. Kannada. good. Extent, 16 Granthas.

सर्वदेवताजयमाला ।

SARVADEVTĀJAYAMĀLĀ.

Begins on fol. 94 (b) of the manuscript described under D. No. 8747.

Complete.

Same work as that described under D. No. 9513.

D. No. 18314.

Palm-leaf. 7 × 1½ inches. Pages, 105. lines, 5 on a page. Kannada. Injured. Extent, 300 Granthas.

जैनपूजाविधिः ।

JAINAPŪJĀVIDHIḤ.

Incomplete.

Similar to the work described under D. No. 8745.

Beginning :

मङ्गलं भगवन्नर्हं, मङ्गलं भगवञ्जिन ।
मङ्गलं प्रथमाचार्यं मङ्गलं वृषभेश्वर ॥
विज्ञानं विमलं यस्य विशदं विश्वगोचरम् ।
नमस्तस्मै जिनेन्द्राय सुरेन्द्राभ्यर्चितांघ्रये ॥
समता सर्वभूतेषु संयमः शुभभावना ।
आर्तरुद्रपरित्यागः सद्भिस्सामयिकं व्रतम् ॥

अथ जिनेन्द्रपूजावन्दनायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भवपूजावन्दनास्तवसमेतं श्रीसिद्धभक्तिकार्योत्सर्गं करोम्यहम् ।

नमो अर्हन्ताणं नमो सिद्धाणं नमो आ इरीयाणां नमो उवज्जाणं नमः सर्वसाहूणम् ।

End :

श्रीजैनमार्गप्रसितान्तरङ्ग-
स्थितिप्रमाणस्थितिदेवताश्च ।
युक्त्यादिकावर्तितपक्षभेदाः
संपूजयाम्यादिममण्डलं स्वयम् ॥

ओं ह्रीं, यक्ष वैश्वानर राक्षस सदृतपन्नगासुर सुरामरपितृ-विश्वामर चाभर वैरोचनम . . विद्यामरविश्वेश्वर पिण्डार्ति इति पञ्च ।

D. No. 18315.

Palm-leaf. $10\frac{3}{4} \times 2\frac{1}{4}$ inches. Pages, 31. Lines, 8 on a page. Kannada. Injured. Extent, 300 Granthas.

जिनाभिषेकविधिः ।

JINĀBHIṢEKAVIDHIḤ.

Begins on fol 1 (a) :—The other works here in are :—Gaulipatanaphalam 17 (a). Gaulipatanaphalam (Kannada) 18 (a) Samvatsaraphalam 21 (a), Śakunaviṣayaḥ. 20 (b) Śakunaviṣayaḥ (Kannada) 26 (a), Vāstulakṣaṇam, 48 (b) (Kannada) Vaidyaviṣayaḥ. 50 (a) (Kannada) Śāstralakṣaṇam, 53 (a) (Kannada).

Complete.

Similar to the work described under D. No. 8745.

श्रीमद्भव्यसमार्जितोर्जितमहापुण्योदयेनोदिते
देवे देवदरादरस्य शिरसि क्षीरांबुधेरंबुभिः ।
यस्येन्द्रोऽभिषवं विधाय विधिवद्भक्त्यानतः पादयोः
पादांभोजनखांशुभिःस्वयमपि स्नातः समायाज्जिनः ॥

स्नात्वाचम्य समेत्य धौतवसनो जैनं परीत्यालयं
द्वारं सर्वसुखागमैकभवनद्वारं समुद्घाटच च ।
गत्वान्तर्मुखवस्त्रमप्यपगतं कृत्वा शरच्चन्द्रवत्
कान्तं वक्त्रमवेक्ष्य वीक्षणसुखं कृत्वा भ . .र्तुःस्तुतीः ॥

Colophon :

इति श्रीमत्पूज्यपादस्वामिविरचितमहाभिषेकः समाप्तः ।

* * * *

श्रीवर्णालङ्कृतं पीठे स्थापयित्वा जिनेश्वरम् ।
निर्वाणाधिपतिर्भूत्वा तस्य स्नपनमारभे ॥

इन्द्रम यमं रक्षो वाहृनार्णवमारुतान् ।
कुबेरे नागेन्द्रचन्द्रानाहूय दिक्पतीन् ॥

End :

पारागन्धा [ताभ्यां स्रुवचरुवि]लसद्दीपधूपैः फलाद्यैः
किंचान्यैर्धन्यमान्यैः सकलसुखकरैः सर्वनव्योपचारैः ।
संसारांभोधिगानां निखिलगुणभुवां चारूरत्नत्रयाणां,
दोषारीणां गुरूणां क्रमकमलयुगं पूजयामोऽघशान्त्यै ॥

D. No. 18316.

Pages, 2. Lines, 8 on a page. Kannada. good. Extent, 22Granthas.

गौलीपतनफलम् ।
GAULĪPATANAPHALAM.

Begins on fol. 17 (a) of the manuscript described under Last No.

Incomplete.

Similar ro the work described under D. No. 13927.

Beginning :

शिरोमध्ये पतेद्गौली मातापित्रोर्गुरोर्मृतिः ।
पार्श्वे तु दक्षिणे ज्येष्ठो वामभागे कनिष्ठहा ॥

पृष्ठे तु मातुलं हन्ति पूर्वभागे धनाधिपः ।
ललाटे राज्यसंपत्तिर्दारिद्रय निधिरूच्यते ? ॥

End :

चरणादूर्ध्वगामी तु यद्यारोहति मस्तकम् ।
राज्यवृद्धि तदादत्ते सरत्नाकरमेखलाम् ॥
मस्तकादि च पादान्तं यथा य . . . . ।

D. No. 18317.

Page, 1. Lines, 8 on a page. Kannada. good. Extent, 7 Granthas.

शकुनविषय:

ŚAKUNAVIṢAYAḤ.

Begins on fol. 20 (b) of the manuscript described under D. No. 1831 .

Incomplete.

Contains Gaulivacanaphala, and Pakṣiśakuna only.

Similar to the work described under D. No. 13995.

Beginning :

ब्रह्मेन्द्रसोमवरुणेष्वपि चिन्त्यमानं
गौली श्रियं हुतवहे च यमेऽर्थलाभम् ।
वायौ ददाति गमनं निॠते च युद्ध-
मीशे विनाशम . . . .साम्यम् ॥

End :

सूर्योदयादिसुरनाथदिगर्धयाम-
काकश्रियं रुधिरतोऽष्टदिशां फलानि ।
लाभारिनाशसुहृदन्तकवित्तविष्टि-
संग्राममृत्युभयदानि वदन्ति तद्ज्ञाः ॥

D. No. 18318.

Palm-leaf. 13¼ × 1½ inches. Pages, 45. Lines, 5 on a page. Kannada. Injured. Extent, 281 Granthas.

जिनदेवतापूजाविधानम्

JINADEVATĀPŪJĀVIDHĀNAM.

Begins on fol. 1 (a). The other works here in are :—

Ratnatrayārādhanavidhiḥ. 23 (a) Padmāvatīstotram. 27 (b) Jainārādhanavidhiḥ. 31 (a).

Complete.

Contains Caityālayapūjā. Describes the manner of conducting the worship of various deities of jainas.

5

Beginning :

आह्वानाद्युपचारत्रितयमिदं
गन्धशवकचयकुसुमैः ।
तत्कमलकर्णिकायां
करोमि जगति गुरोऽर्हतोऽर्हम् ॥

ओं ह्रीं, श्रीं, क्लीं, ऐं, अर्हन्नत्र, एहिसं वौषट्, नमोऽर्हं ते स्वाहा ।

* * * *

समस्तागमवेदङ्गप्रस्तुतं धर्ममर्हतम् ।
आह्वयाम्यर्चनादिष्टस्वर्गमुक्तिसुखप्रदम् ॥

ओं, ह्रीं,श्रीं, क्लीं, ऐं, अर्हन्, जिनधर्म, अत्र एहि, सवौषट्, स्वाहा,

* * * *

अथ चैत्यपूजा—अथ वायव्यदिगन्ताभ्यन्तरे—

कोप्यर्हत् प्रतिमाः शतानि नवतिः पञ्चोत्तरा विंशतिः
पञ्चाशद् त्रियुता जगत्सुगुणिता लक्षाः सहस्राणि तु ।
सप्ताग्रासि च विंशतिर्नवशताद्यूनं शतार्धं मता-
स्ता नित्याः पुरुतुङ्गपूर्वमुखसत्पर्यङ्कबन्धासुधीः ? ॥

End :

जयजय जिन सिद्धान् सूर्युपाध्यायसाधून्
जयजय जिन धर्मान् शास्त्रबिंबालयाख्यान् ।
जय जय जिन सम्यग्दर्शनज्ञानवृत्तं
जय जय जगदीशं जैननित्यप्रकाशम् ॥

D. No. 18319.

Pages, 9. Lines, 5 on a page. Kannada. Injured. Extent, 52 Granthas.

रत्नत्रयाराधनविधिः

RATNATRAYĀRĀDHANAVIDHIḤ.

Begins on fol. 23 (a) of the manuscript described under Last No.

Complete.

Same work as that described under D. No. 8769.

D. No. 18320.

Pages, 15. Lines, 5 on a page. Kannada. Injured. Extent, 75 Granthas.

जैनाराधनविधिः

JAINĀRĀDHANAVIDHIḤ.

Begins on fol. 31 (a) of the manuscript described under D. No. 18318.

Incomplete.

Same work as that describes under D. No. 8754 and where in see the b eginning :—

End :

षट् आदित्यमहत्वमात्मपरिवारदेवतासमन्वित इदमुपचारं गृहाण, ममैकादशस्थानफलं वरं देहि, अशुभस्थानस्थित्युदयदृष्टिदोषं मा कुरु । परमात्मव्यसनं सपन्यो शुक्लेस्य दिकोनरः षट्लेस्य नर समाप्तिः (?) ।

D. No. 18321.

Pages, 6. Lines, 5 on a page. Kannada. Injured. Extent, 40 Granthas.

पद्मावतीस्तोत्रम्

PADMĀVATĪSTOTRAM.

Begins on fol. 27 (b) of the manuscript described under D. No. 18318.

Complete.

Similar to the work described under D. No. 14596.

Beginning :

श्रीमत्कुक्कुटसर्ववाहनवती पाताललोकेश्वरी
राकाचन्द्रमसा विनिन्दितमुखे मन्त्राक्षरोल्लासिते ।
बालार्कोज्वलकान्तिवृन्दकलिता लावण्यशोभावती
नागाधीशसती महाभगवती मां रक्ष पद्मावती ।

End :

पूजिता भरताद्यैश्च भूपेन्द्रैर्भूरिभूषिभिः ।
चतुर्विधश्च संघश्च शान्ति कुर्वन्तु शाश्वतम ॥

D. No. 18322.

Palm-leaf. 14½ × 1½ inches. Pages, 150. Lines, 7 on a page. Kannada. Much Injured. Extent, 1,837 Granthas.

प्रतिष्ठातिलकम् by ब्रह्मसूरि

PRATIṢṬHĀTILAKAM by BRAHMASŪRI.

Incomplete.

Contains Parvās 1 to 5 Incomplete.

Same work as that described under D. No. 3705.

D. No. 18323.

Palm-leaf. 14 × 1½ inches. Pages, 114. Lines, 9 on a page. Kannada. Slightly Injured. Extent, 1,095 Granthas.

प्रतिष्ठातिलकम् by ब्रह्मसूरिः

PRATIṢṬHĀTILAKAM by BRAHMASŪRI.

Incomplete.

Contains Parvās 4 to 8.

Same work as that described under D. No. 3705.

D. No. 18324.

Pages, 34. Lines, 8 on a page. Kannada. Slightly Injured. Extent, 35 Granthas

जैनाचार्यपरम्परामहिमा

JAINĀCĀRYAPARAMPARĀMAHIMĀ.

Begins on fol. 1*a* of the manuscript described under D. No. 3026.

Where in this work has been mentioned as Guruśiṣyalakṣaṇa in the list of other works.

Gives an account of the spiritual preception of Jasinas.

Complete.

Beginning :

श्रीमद्राजाधिराजेन्द्रगुरुर्वादिपितामहः ।
सारभूमण्डलाचार्यो वल्लालनृपपालकः ।।
देशे गणोदयाद्रीन्द्रसूर्यः सूरिकुलाधिपः ।
कुण्डकुण्डान्वयाम्भोधिवर्धनैकसुधाकरः ।।
श्रीमद्वेल्ल्(गुल) नाड्सिंहासनाधिनाथः प्रसन्नधीः ।
श्रीऽचारुकीर्तियोगीन्द्रःपण्डिताचार्यसंज्ञकः ।।
सोऽहं मदन्वयायातप्रियशिष्याय केवलम् ।
गुरुभक्तिविशिष्टाय गुणाढ्याय सुधीमते ।।

सुवोम्मरससंज्ञाय पण्डितायादरादहम् ।
प्रपितोऽस्मि दृढं पत्रमेतद्धि शुभकारणम् ॥

समानं पत्रमेतद्धि त्रयाणां भवतामपि ।

* * * * *

श्रुतोस्मि भवदीयं च परिणामं विशेपतः ।

* * * * *

तारतम्यं क्रमस्तद्धि गुरुशिप्यादिभेपजम् ।
स गुरुर्द्विविधो लोके शिक्षकान्यविभेदतः ॥

शिक्षागुरुः शिक्षकः स्यादन्यः साधारणो गुरुः ।
येनैव शिक्षिताः पूज्याः सर्वैः सद्गुणशालिनः ।
अभेदभावनायातगुरुवासनयान्वितः ॥

* * * * *

इदं पवित्रं पापघ्नं पुण्यदं पूततापदम् ।
दक्षिणाचार्यमाहात्म्यं मुनिसन्तानसंश्रितम् ॥

शापानुग्रहसामर्थ्यशक्तिवृद्धिसुखास्पदम् ।
शृणु चेतः समाधाय भो बोम्मरसपण्डित ॥

व्रताचरणपुण्याभिवृद्धिशक्तिसुखादिकम् ।
जायते नहि कश्चिद्वा शिक्षाचार्याद्विना सुखम् ॥

* * * * *

पूर्वस्मादागतः सोऽयं, पूर्वाचार्य इतीर्यते ।
दक्षिणादागतः सोऽयं दक्षिणाचार्यपुङ्गवः ॥

पश्चिमादागतः सोयं पश्चिमाचार्य इत्यपि ।
उत्तरादागतः सोयमुत्तराचार्यसंज्ञकः ॥

सेनसङ्घो नन्दिसङ्घः सिंहसंघाख्य इत्यपि ।

* * * * *

तत्पट्टे वीरनन्दयाख्यः सञ्जातो मुनिपुङ्गवः ।
शिष्यैः पञ्चसहस्रैश्च मुनिभिः परिवेष्टितः ॥

चम्पापुरे प्रसिद्धोऽयं काव्यं चन्द्रप्रभाह्वयम् ।
चकार तस्य पट्टेऽभूद्गोल्लाचार्यो महामुनिः ।।

कुमारदीक्षितो लब्धवराल्लब्धमहोदयः ।
गोल्लदेशादिपूजातो गोल्लाचार्याह्वयो महान् ।।

* * * * *

तत्सधर्मः प्रभाचन्द्रपण्डिताचार्यसंज्ञकः ।
शाकटायनसूत्रस्य न्यासं चक्रे विचक्षणः ।।

सपादलक्षसंख्याकं न्यासं मार्तण्डसंज्ञकम् ।
सन्न्यायकौमुदीं चन्द्रोदयं सकलगोचरम् ।।

End :

मुहूर्तमपि न स्थेयो रोषो हृदि सुखार्थिनाम् ।
जैनमार्गस्थितानां किमस्माकं तत्पृथङ्मतम् ।।
एवं विचारे ते कार्यमस्ति तद्भवतां यथा ।
हृदये द्योतते कार्यं तथा सर्वमपि स्फुटम् ।।

इन्द्रादिनतयोगीन्द्रप्रणीतातिशयास्पदा ।
सद्धर्मवृद्धिरित्याशीरस्तु ते सुखदायिका ।।

श्रीपञ्चगुरुभ्यो नमः ।

D. No. 18325.

Sritala. 14 × 1¾ inches. Pages, 244. Lines, 8 on a page. Kannada. Slightly Injured. Old. Extent, 2,800 Granthas.

जिनसंहिता कर्णाटकटिप्पणी सहिता by कुमुदचन्द्र :

JINASAMHITĀ with KANNAḌA MEANING by KUMUDACANDRA

Incomplete.

Breaks off in mokṣamārgamantra of yantrārādhanavidhi.

Same work as that described under D. No. 8742.

D. No. 18326.

Pages, 26. Lines, 7, 8 on a page. Kannada. Slightly Injured. Extent, 208 Granthas.

जैनव्रतस्वरूपफलवर्णनम् कर्णाटकटीकासहितम्

JAINAVRATASVARŪPAPHALAVARṆANAM with Kannada meaning.

Begins on fol. 96*a* of the manuscript described under D. No. 9470.

Incomplete.

Same work as that described under D. No. 18479 but with Kannada commentary.

D. No. 18327.

Pages, 2. Lines, 7 on a page. Telugu. Injured. Extent, 17 Granthas.

नृसिंहाष्टोत्तरशतनामावलिः

NṚSIṀHĀṢṬOTTARAŚATANĀMĀVALIḤ.

Begins on fol. 89*a* of the manuscript described under D. No. 4877.

Incomplete.

Contains 70 Names only.

Same work as that described under D. No. 8955.

D. No. 18328.

Pages, 5. Lines, 8 on a page. Telugu. Injured. Extent, 60 Granthas.

वेङ्कटेशाष्टोत्तरशतनामावलिः

VEṄKAṬEŚĀṢṬOTTARAŚATANĀMĀVALIḤ.

Begins on fol. 86*a* of the manuscript described under D. No. 4877.

Complete.

Same work as that described under D. No. 9088.

D. No. 18329.

Pages, 8. Lines, 9 on a page. Telugu. Much injured. Extent, 110 Granthas

आह्निकविचारः

ĀHNIKAVICĀRAḤ.

Begins on fol. 90 of the manuscript described under D. No. 4877.

Deals with the daily rituals of Brahmins just like Vaiśvadeva.

Incomplete.

Wants beginning and end.

Beginning :

हृचणे तदभाव उपपद्यते । यत्तु ईश्वरवचनं, ... धूपदीपादि निवेदयेत्, . . . शृणु "तां, पापनाशिकां" इति, ॥ तत्र पापनाशस्य . . . तादृशफलाभिसन्धिमदधिकारविषयत्वं स्पष्टम्, . . . है . . .

* * * * *

अथ वैश्वदेवविषये—

वैश्वदेवाकृतं पापं भिक्षुरेको निवारयेत् ।
भिक्षुपूजाकृतं पापं, वैश्वदेवो निवारयेत् ॥

End :

तक्षणानुयोग्ये कन्दरे तदयोग्ये खदिरे च लब्धे प्रधानविरोधपरिहाराय हि तक्षणादिधर्मलोपाभ्युपगमेन खदिरोपादानमाश्रितम् । तद्वत् स्वेतरसर्वभागवततीर्थलाभरूपप्रधानलोपपरिहाराय स्वपादसंसर्गविरहरूपधर्मस्य लोपाभ्युपगमेन तन्त्रेणासर्वतीर्थग्रहणं न्याय्यम् । स्वपादतीर्थसंसर्गोऽपि संकल्पभेदात् पुण्यात्।

D. No. 18330.

Pages, 12. Lines, 7 on a page. Telugu. Much injured. Extent, 120 Granthas

गृहार्चासंप्रोक्षणविधिः

GṚHĀRCĀSAMPROKṢAṆAVIDHIḤ.

Begins on fol. 94*a* of the manuscript described under D. No. 4877.

Complete.

Similar to the work described under D. No. 5247.

Beginning :

पुण्यर्क्षे तिथिवारलग्नेषु यजमानानुकूलदिनेषु पञ्चमे सप्तमेऽह्नि वा स्वसूत्रोक्तविधानेन अङ्कुरार्पणं कृत्वा प्राणानायम्य संकल्प्य पुण्याहं वाचयित्वा बिम्बमश्वक्रान्तेति मृद्भिरद्भिश्च विमृज्य विष्णुगायत्र्या श्वेतसूत्रं, हरिद्रया उन्मृज्य इमं विष्णुरिति बध्वा मूलमन्त्रेण संस्पृश्य—

End :

माणिक्यं पद्मरागं च नीलं वज्रं च पुण्यकम् ।
प्रवालमणिमुक्ता ततो मरतकं क्षिपेत् ॥

अङ्कुरार्पणप्रकारः—प्रतिष्ठादिनात् पूर्वं तृतीयेऽह्नि सायाह्ने . पिटकामादाय ऋत्विग्भिः ब्राह्मणैः सह वेदवाद्यघो . . . .

D. No. 18331.

Pages, 5. Lines, 7 on a page. Telugu. Injurd. Extent, 52 Granthas.

आधारशक्तिप्रयोगः

ĀDHARAŚAKTIPRAYOGAH.

Begins on fol. 100*a* of the manuscript described under D. No. 4877.

Complete.

Same work as that described under D. No. 3546.

Fol. 102*b* certains Śrīpādatīrthavaibhava.

D. No. 18332.

Pages, 20. Lines, 8 on a page. Character. Telugu. Extent, 240 Granthas.

पदार्थसंग्रहः by शठकोपः

PADĀRTHASAṄGRAHAḤ by ŚAṬHAKOPA.

Begins on fol. 103*b* of the manuscript described under D. No. 4877.

An explanatory work on the various terms used in Viśiṣṭādvaita Vedanta by one Śaṭhakopar.

Complete.

Beginning :

प्रणम्य श्रीभाष्यकारचरणांभोरुहद्वयम् ।
पदार्थसंग्रहं कुर्वे बालानां बोधसिद्धये ॥

पदार्थो द्विविधः । प्रमाण प्रमेय भेदात् । तत्र प्रमाकरणं प्रमाणम् । यथावस्थितस्य . . . . नुगुणंप्रमा । व्यापारवत्कारणं करणं । यद्धि यज्जनयित्वैव कार्यं जनयति स तस्य व्यापारः ।

End :

इति श्रीभाष्यकारस्य कटाक्षाद्रचितो मया ।
पदार्थसंग्रहस्तस्मादेनं गृह्णन्तु सज्जनाः ॥

ह्यमुखपदांभोरुह द्वन्द्वार्चनैकपरायणो
यतिपतिमतश्रद्धाभक्तरितस्वकमानसः ।
शटभिदभिधो विद्वद्ग्रामार्यवर्यतनुभुवो
व्यरचयदिमं ग्रन्थं गृह्णन्तु . .

Colophon :

इति पदार्थसंग्रहः समाप्तः

The Scribe adds—

यत्कटाक्षणसंपातलब्धसत्वो हि मादृशः ।
रामगुरुस्सोयं जेयादाचन्द्रतारकम् ।।

कुतर्कसागरे मग्नं मामुद्धृत्य गुरोः करे ।
योऽदान्महार्यनामा स प्राचार्यो जयतु ध्रुवम् ।।

श्री कौशिकान्वयमहाम्बुधिशीतभानु
श्री शुद्धसत्वगुरुवर्यपदाब्जभृङ्गम् ।
तस्मादवाप्तनिगमान्तयुगं
श्रीमन्महागुरुमहं शरणं प्रपद्ये ।।

Fol. 113 contains Ghaṇṭāravaviṣaya.

D. No. 18333.

Palm-leaf. 15 × 2 inches. Pages, 133. Lines, 10, 12 on a page. Grantha. Injured. Extent, 2,814 Granthas.

भगवन्तभास्करः by नीलकण्ठः

BHAGAVANTABHĀSKARAḤ by NĪLAKAṆṬHA.

Incomplete.
Contains Vyavahāramayūkha only.
Same work as that described under D. No. 2766.

D. No. 18334.

Palm-leaf. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 276. Lines, 7 on a page. Grantha Very much Injured. Extent, 4,736 Granthas.

सिद्धान्तकौमुदी by भट्टोजिदीक्षितः

SIDDHĀNTAKAUMUDI by BHAṬṬOJIDIKṢITA.

Complete.
Same work as that described under D. No. 1354.

D. No. 18335.

Palm-leaf. 9¼ × 1½ inches. Pages, 16. Lines, 8 on a page. Grantha. Good. Extent, 100 Granthas.

मनुस्मृतिः by मनुः

MANUSMṚTIḤ by MANU.

Begins on fol. 1*a*.

The other work herein is Yājñavalkyasmṛtiḥ 9 (*a*).

Incomplete.

Contains the 1st 97 verses in 8th Adhyāya.

Same work as that described under D. No. 2663.

D. No. 18336.

Pages, 58. Lines, 10 on a page. Grantha. Slightly injured. Extent, 370. Granthas.

याज्ञवल्क्यस्मृतिः by याज्ञवल्क्यः

YĀJÑAVALKYASMṚTIḤ by YĀJÑAVALKYA.

Begins on fol. 9*a* of the manuscript described under D. No. 18335.

Incomplete.

Contains from Rājanītiprakaraṇa in the Ācārādhyāya to the end of Vyavahārādhyāya.

Same work as that described under D. No. 2676.

D. No. 18337.

Palm-leaf. 15 × 1½ inches. Pages, 24. Lines, 6, 7 on a page. Grantha. Much injured. Extent, 150 Granthas.

तन्त्रसमुच्चयः

TANTRASAMUCCAYAḤ.

Incomplete.

Leaves are broken.

Describes certain kinds of fume and unguent that are to be used fo the purpose of driving away evil spirits as well as disease from any person. For certain diseases the repetition of some incantations are suggested.

. . . .

. . . .

उद्भ्रान्तपत्रमादाय . .श्वानदन्तकम् ।

कट्यामेतद्द्वयं बध्वा . . बगवद्ध्रुवम् ''

मक्षस्य कर्तव्यसभिमत्त्रणम् ॥

प्रातः पुष्पाणि संगृह्य मालां शिरसि धारयेत् ।
नां वक्त्रेधारयेद्योऽसौ क्षुत्पिपासा न बाधयेत् ॥

End :

निशासर्पपचूर्णेन लेपयेत्तत्प्रयत्नतः ।
छायाशुष्कं . . . संगृहीत विचक्षणः ।

D. No. 18338.

Palm-leaf. 15 × 1½ inches. Pages, 108. Lines, 7 on a page. Grantha Much injured. Extent, 2,000 Granthas.

तैत्तिरीयोपनिषद्भाष्यम् by शङ्कराचार्य ।

TAITTIRIYOPANIṢADBHĀṢYAM by ŚAṄKARĀCĀRYA.

Incomplete (Almost complete).

Breaks off in the 10th Anuvāka of Bhṛguvalli.

Same work as that described under D. No. 505.

D. No. 18339.

Palm-leaf. 8 × 2 inches. Pages, 108. Lines, 10 on a page. Grantha, Good. Extent, 800 Granthas.

शिवगीता

ŚIVAGĪTĀ.

Complete in Adhyāyās 1 to 16.

Same work as that described under D. No. 2546.

D. No. 18340.

Palm-leaf. 14 × 2 inches. Pages, 402. Lines, 10—15 on a page. Grantha Slightly injured. Extent, 10,000 Granthas.

विवादभङ्गार्णवः by जगन्नाथपञ्चाननः

VIVĀDABHANAGĀRṆAVAH by JAGANNĀTHAPAÑCĀNANA.

Incomplete.

Contains Ratnas 1 to 8 in Dāyabhāga.

Same work as that described under D. No. 3197.

D. No. 18341.

Palm-leaf. 16¾ × 1 inches. Pages, 28. Lines, 5 on a page. Grantha. Injured. Extent, 210 Granthas.

सदाशिवमहारायताम्रशासनम् by वीरणाचार्य.

SADĀŚIVAMAHĀRĀYATĀMRAŚĀSANAM by VĪRAṆĀCĀRYA.

Incomplete.

Wants a small portion at the end, otherwise.—Complete.

Same work as that described under R. No. 5531. Wherein see for the beginning.

R. No. 5531 is partly restored copy of this manuscript.

End :

वीरश्रीराजराजस्य विज्ञप्तिमनुपालयन् ।
परितः प्रयतैः स्निग्धैः पुरोहितपुरोगमैः ॥
विविधैर्विबुधैः श्रैतपथिकैरधिकै . . रा ।
सदाशिवमहारायो माननीयो मनस्विनाम् ॥

स हिरण्यपयोधारापूर्वकं दत्तवान् पुरा ।
सरससदाशिवरायक्षितिपर्यस्य कीर्तिधुर्यस्यतिव ।
शासनमिदं शरासनदाशरथेरमितहेमदानरतेः ॥
मृदुपदमिति ताम्रशासनार्थं
महितसदाशिवरायशासनेन ।
हर (अभ or अफ) णदनुगुणं बचोमहिम्ना
सरसतरेण सभापतिः स्वयंभूः ॥

सदाशिवमहारायशासनाद्वीरना (णा) त्मजः ।
क्वमासी वीरणाचार्यो . . . . ॥

D. No. 18342.

Palm-leaf. 13 × 1½ inches. Pages, 85. Lines, 5, 6 on a page. Grantha Injured. Extent, 770 Granthas.

स्मृतिचन्द्रिका by देवनभट्ट.

SMṚTICANDRIKĀ by DEVANABHAṬṬA.

Incomplete.

Contains Vyavahārakāṇḍa only.

Same work as that described under D. No. 2779.

Do. No. 18343.

Palm-leaf. 14 × $1\frac{1}{2}$ inches. Pages, 144. Lines, 6, 7 on a page. Grantha Very much injured. Extent, 1,650 Grnthas.

तत्वचिन्तामणिदीधितिप्रकाशिका by गदाधर :

TATTVACINTĀMṆNIDĪDHITIPRAKĀŚIKĀ by GADĀDHARA.

Incomplete.

Contains Avayava incomplete.

Same work as that described under D. No. 4059.

D. No. 18344.

Palm-leaf. $8\frac{3}{4}$ × $1\frac{1}{2}$ inches. Pages, 102. Lines, 9 on a page. Grantha. Injured. Extent, 1,000 Granthas.

सांख्यकारिका-सांख्यतत्वकौमुदी सहिता ।

SĀṄKHYAKĀRIKĀ with SĀṄKHYA TATTVAKAUMUDI.

Begins on fol. 1*a*.—The other work here in is : Brahmasūtram, 62*a*.

Complete.

But leaves are in disorder.

Same work as that described under R. No. 2050.

D. No. 18345.

Pages, 38. Lines, 9 on a page. Grantha. Injured. Extent, 350 Granthas.

ब्रह्मसूत्राणि by व्यास:

BRAHMASŪTRĀṆI by VYĀSA.

Begins on fol. 62 *a* of the manuscript described under D. No. 18344.

Incomplete.

Contains up to 1st Pāda of IVth Adhyāya.

Same work as that described under D. No. 4649.

D. No. 18346.

Palm-leaf. $13\frac{1}{2}$ × $1\frac{1}{4}$ inches. Pages, 118. Lines, 6 on a page. Grantha. Injured. Extent, 1,000 Granthas.

नैषधम् by श्रीहर्ष:

NAIṢADHAM by ŚRĪHARAṢA.

Incomplete.

Contains 1, 2, 3, 4 and 18 Sargās complete.

Same work as that described under D. No. 11543.

D. No. 18347.

Palm-leaf. 10 × 1½ inches. Pages, 354. Lines, 7 on a page. Telugu. Injured. Extent, 3,717 Granthas.

भगवद्गीताव्याख्या—सुबोधिनी by श्रीधर:

BHAGAVADGĪTĀVYĀKHYĀ—SUBODHINĪ by ŚRĪDHARA.

Complete.

Same work as that described under D. No. 2059.

D. No. 18348.

Palm-leaf. 13½ × 1⅝ inches. Pages, 44. Lines, 6 on a page. Grantha. Very much Injured. Extent, 400 Granthas.

याज्ञवल्क्यस्मृति: by याज्ञवल्क्य:

YĀJÑAVALKYASMṚTIḤ by YĀJÑAVALKYA.

Incomplete.

Contains Vyavahārakāṇḍa only.

The last fol. contains some incomplete Tamil work.

Same work as that described under D. No. 2678.

D. No. 18349.

Palm-leaf. 13½ × 1¼ inches. Pages, 7. Lines, 6 on a page. Telugu. Much injured. Extent, 60 Granthas.

अग्निसन्धानप्रयोग:

AGNISANDHĀNAPRAYOGAḤ.

Begins on fol. 1*a*.

The other works herein are—Śrāddhaprayoga 5*a*, 25*a*.

Incomplete.

Wants beginning. Otherwise complete.

Similar to the work described under R. No. 61 (r).

Beginning :

ओं भूर्भुव: सुव: स्वाहा-प्रजापतय इदं न मम, ओं अनेक दर्शपूर्णमासस्थालीपाकाकरणप्रायश्चित्तार्थं सर्वप्रायश्चित्तहोमं होष्यामि । ओं भूर्भुव: सुव: स्वाह ।

* * * *

— ओं विच्छिन्नाग्निसन्धानकर्मणि मध्ये संभावितमन्त्रतन्त्रस्वरवर्ण विधिविपर्यासन्यूनातिरिक्तप्रायश्चित्तार्थं सर्वप्रायश्चित्तं अनाज्ञात-प्रायश्चित्ताहुतिभि: होष्ये ।

End :

कर्मादौ कर्मणश्चान्ते कर्मलोपनिवृत्तये ।
सर्वतन्त्रस्वतन्त्रं तं वेदान्तार्यमहं भजे ॥

Colophon :

विच्छिन्नाग्निसंधानं समाप्तम् ।

D. No. 18350.

Pages, 26. $6\frac{3}{4} \times 1$ inches. Lines, 5 on a page. Telugu. Injured. Extent, 100 Granthas.

श्राद्धप्रयोगः

ŚRĀDDHAPRAYOGAḤ.

Begins on fol. 25*a* of the manuscript described under D. No. 18349.
Complete.
Similar to the work described under D. No. 3827.
Fol. 38 to 46 contains mahālayaśrāddhavidhi.

Beginning :

. . . . वदाय द्विरभिधार्य अग्नये स्विष्टकृते स्वाहा, अग्नये स्विष्टकृते इदम् ।

End :

मध्यपिण्डौ पत्नीं, प्राशयेत्, ततस्तर्पणं, कुर्यात् ।

D. No. 18351.

Pages, 40. Lnes, 6, 7 on a page. Telugu. Injured. Extent, 360 Granthas.

श्राद्धप्रयोगः

ŚRĀDDHAPRAYOGAḤ.

Begins on fol. 5*a* of the manuscript described under D. No. 18349.
Complete.
Similar to the work described under D. No. 3824.

Beginning :

आचम्य प्राचीनावीती ओं,
समस्तसंपत्समवाप्ति + + ब्राह्मणपादपांसवः ।

उपवीती देवेभ्यः प्राचीनावीती पितृपितामहप्रपितामहेभ्यो नमः । उपवीती विष्णवे नमः ।

* * * *

मम च प्रत्याब्दिकश्राद्धकरणे अधिकारसम्पदस्त्वति अनुगृहाण ।

End :

पवित्रग्रन्थिं विस्रस्य—ये केचित् . . . मृताः ।
ते गृह्णन्तु मया दत्तं सूत्रनिष्पीडनोदकम् ॥

* * * *

अद्वैतमत . . . . . संयुतः ।
माध्वसिद्धान्तविध्वंसी श्रीनिवासयतीश्वरः ॥

D. No. 18352.

Palm-leaf. 15½ × 1 inches. Pages, 42. Lines, 6 on a page. Grantha. Injured. Extent, 500 Granthas.

शब्दार्थसारमञ्जरी by भवानन्दवागीशः ।

ŚABDĀRTHASĀRAMAÑJARĪ by BHAVĀNANDAVĀGĪŚA.

Begins on fol. 1*a*.

The other works here in are—

Anumitivicāra, 22*a*.
Ākhyātavāda, 65*a*.
Bādhabuddhivādārtha, 71*a*.
Parāmarśavāda, 80*a*.
Viṣayatāvāda, 92*a*.
Vyutpattivādavyākhyā, 105*a*.
Śrīkṛṣṇārādhana, 117*a*.

Complete.

Contains kārakavivecana.

Leaves are broken in the beginning.

Same work as that described under D. No. 4309.

D. No. 18353.

Pages, 85. Lines, 6 on a page. Grantha. Injured. Extent, 1,200 Granthas.

अनुमितिविचारः by हरिरामतर्कवागीशः ।

ANUMITIVICĀRAḤ by HARIRĀMATARKAVĀGĪŚA.

Begins on fol. 22*a* of the manuscript described under D. No. 18352.

Complete.

Similar to the work described under D. No. 3914.

Beginning :

अनुमितिपरामर्शयोः सामान्यतोऽनुमितित्वपरामर्शत्वाभ्यां कार्यकारणभावः । परामर्शत्वञ्च जातिविशेषः । ननु व्याप्ति-विशिष्टपक्षनिश्चयत्वं, अतो व्याप्त्यादेः साध्यादिभेदेनाननुगमेऽपि न क्षतिः । न च तादृशजातौ मानाभावः । अनुमितिरूपानुगत-कार्यजनकतावच्छेदकतयैव तत्सिद्धेः । न च तादृशजातेः चाक्षुषत्वादिना सांकर्यमिति वाच्यम् । मानसपरामर्श एव तादृश-जातिस्वीकारेण चाक्षुषादिसाधारण्यविरहेण सांकर्यविरहात् ।

End :

अत्रेदं, विभावनीयं, व्याप्यविशेष्यकपक्षविशेष्यकपरामर्श-योरनुगतरूपेण हेतुताकल्पने पक्षविशेष्यकपरामर्शकाले सिद्धिसत्वे प्यविशेष्यकपरामर्शेनानुमिनुयामित्याकारकेच्छाकालेऽनुमित्यापत्तिः । व्याप्यविशेष्यकपरामर्शकाले अनुमित्युत्पादिकायास्ता-दृशपरामर्शकान्यत्वप्रकारकानुमित्साविरहविशिष्टकूटघटितसाम-ग्र्यास्तत्राप्यक्षतत्वात् । एवं व्याप्यविशेष्यकपरामर्शकाले सिद्धिसत्वे पक्षविशेष्यकपरामर्शेनानुमिनुयामित्याकारकेच्छासत्वा-दनुमित्यापत्तिरिति विशिष्यैव तादृशपरामर्शयोर्हेतुत्वं युक्तमिति समासः ।

Colophon :

इति श्रीहरिरामतर्कवागीशभट्टाचार्यविरचितोऽनुमानविचारः समाप्तः ।

D. No. 18354.

Pages, 12. Lines, 6 on a page. Grantha. Injured. Extent. 180 Granthas.

आख्यातवादः by तार्किक शिरोमणिः ।

ĀKHYĀTAVĀDAḤ by TĀRKIKAŚIROMAṆI.

Begins on fol. 65*a* of the manuscript described under D. No. 18352.

Incomplete.

Wants the beginning, otherwise complete.

Same work as that described under D. No. 3921.

D. No. 18355.

Pages, 18. Lines, 6 on a page. Grantha. Injured. Extent, 25[illegible] Granthas.

बाधबुद्धिवादार्थः by हरिराम ।

BĀDHABUDDHIVĀDĀRTHAḤ by HARIRĀMA.

Begins on fol. 71*a* of the manuscript described under D. No. 18352.

Incomplete.

Wants end :

Same work as that described under R. No. 2253 (*5*).

D. No. 18356.

Pages, 21. Lines, 6 on a page. Grantha. Injured. Extent, 300 Granthas.

परामर्शवादः by हरिरामः ।

PARĀMARŚAVĀDAḤ by HARIRĀMA.

Begins on fol. 80*a* of the manuscript described under D. No. 18352.

Complete.

Similar to the work described under D. No. 4268.

Beginning :

